# Adyanta shlokANi

# આદ્યંત શ્લોકાણિ

## Document Information

Text title : Adya.nta shlokANi

File name : Adi_antya.itx

Category : vedanta, yoga

Location : doc_yoga

Transliterated by : H. P. Raghunandan and Shrisha Rao

Proofread by : H. P. Raghunandan and Shrisha Rao

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# આદ્યંત શ્લોકાણિ

શ્રી ગીતાભાષ્યમ્

આદિ

દેવંનારાયણં નત્વા સર્વદોષવિવર્જિતમ્ ।
પરિપૂર્ણં ગુરુંશ્ચાન્ ગીતાર્થં વક્ષ્યામિ લેશતઃ ॥ ૧॥

અંત્ય

પૂર્ણાદોષમહાવિષ્ણોર્ગીતામાશ્રિત્ય લેશતઃ ।
નિરૂપણં કૃતં તેન પ્રિયતાં મે સદા વિભુઃ ॥ ૧॥

॥ શ્રી બ્રહ્મસૂત્રભાષ્યમ્ ॥

આદિ

નારાયણં સર્વગુણૈરુદીર્ણં દોષવર્જિતમ્ ।
જ્ઞેયં ગમ્યં ગુરુંશ્ચાપિ નત્વ સૂત્રાર્થમુચ્યતે ॥ ૧॥

અંત્ય

જ્ઞાનાનંદાદિભિસ્સર્વૈર્ગુણૈઃ પૂર્ણાય વિષ્ણવે ।
નમોઽસ્તુ ગુરવે નિત્યં સર્વથાતિપ્રિયાય મે ॥ ૧॥

યસ્ય ત્રીણ્યુદિતાનિ વેદવચને રૂપાણિ દિવ્યાન્યલમ્ ।
બટ્તદ્દર્શનમિત્થમેવ નિહિતં દેવસ્ય ભર્ગો મહત્ ।
વાયોરામવચનોયં પ્રથમકં પૃક્ષો દ્વિતીયં વપુઃ ।
મધ્વોયત્તુ તૃતીયકં કૃતમિદં ભાષ્યં હરૌ તેનહિ ॥ ૨॥

નિત્યાનંદો હરિર્પૂર્ણો નિત્યદા પ્રિયતાં મમ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ ચ વિષ્ણવે ॥ ૩॥

॥ શ્રીમદણુભાષ્યમ્ ॥

આદિ

વિષ્ણુરેવ વિજિજ્ઞાસ્યઃ સર્વકર્તાઽઽગમોદિતઃ ।

સમન્વયાદીક્ષતેશ્ચ પૂર્ણાનંદોઽંતરઃ ખવત્ ॥ ૧॥

અંત્ય

નમો નમોઽશેષદોષદૂર પૂર્ણગુણાત્મને ।
વિરિઞ્ચિ શર્વપૂર્વેઽયવંદ્યાય શ્રીવરાય તે ॥ ૧॥

॥ શ્રીમદનુવ્યાખ્યાનમ્ ॥

આદિ

નારાયણં નિખિલપૂર્ણગુણૈકદેહં ।
નિર્દોષમાપ્યતમમપ્યખિલૈસ્સુવાક્યૈઃ ।
અસ્યોદ્ભવાદિદમશેષવિશેષતોઽપિ ।
વંદ્યં સદા પ્રિયતમં મમ સન્નમામિ ॥ ૧॥

તમેવ શાસ્ત્રપ્રભવં પ્રણમ્ય જગદ્ગુરૂણાં ગુરુમઞ્જસૈવ ।
વિશેષતોમે પરમાખ્યવિદ્યા વ્યાખ્યાં કરોમ્યન્વપિ ચાહમેવ ॥ ૨॥

અંત્ય

નિઃશેષદોષરહિત કલ્યાણાખિલસદ્ગુણ ।
ભૂતિસ્વયંભુશર્વાદિવંદ્યં ત્વાં નૌમિ મે પ્રિયં ॥ ૧॥

॥ શ્રીપ્રમાણલક્ષણમ્ ॥

આદિ

અશેષગુરુમીશેશં નારાયણમનામયમ્ ।
સમ્પ્રણમ્ય પ્રવક્ષ્યામિ પ્રમાણાનાં સ્વલક્ષણમ્ ॥ ૧॥

અંત્ય

અશેષમાનમેયૈક સાક્ષિણેઽક્ષયમૂર્તયે ।
અજેશપુરુહૂતેઽય નમો નારાયણાય તે ॥ ૧॥

॥ શ્રીકથાલક્ષણમ્ ॥

આદિ

નૃસિંહમાખિલાજ્ઞાનતિમિરાશિશિરદ્યુતિં ।
સમ્પ્રણમ્ય પ્રવક્ષ્યામિ કથાલક્ષણમઞ્જસ ॥ ૧॥

અંત્ય

સદોદિતામિતજ્ઞાનપૂરવારિતહૃત્તમાઃ ।

નરસિંહઃ પ્રિયતમઃ પ્રિયતાં પુરુષોત્તમઃ ॥ ૧॥

॥ શ્રીઉપાધિખણ્ડનમ્ ॥

આદિ

નારાયણોઽગણ્યગુણનિત્યૈકનિલયાકૃતિઃ ।

અશેષદોષરહિતઃ પ્રિયતાં કમલાલયઃ ॥ ૧॥

અંત્ય

માયાવાદતમોવ્યાપ્તમિતિ તત્ત્વદૃષા જગત્ ।

ભાતં સર્વજ્ઞસૂર્યેણ પ્રીતયે શ્રીપદેસ્સદા ॥ ૧॥

નમોઽમંદનિજાનંદસુંદરસાંદ્રમૂર્તયે ।

ઇંદિરાપતયે નિત્યાનંદભોજનદાયિને ॥ ૨॥

॥ શ્રીમાયાવાદખણ્ડનમ્ ॥

આદિ

નરસિંહોઽખિલાજ્ઞાનમતધ્વાંતદિવાકરઃ ।

જયત્યમિતસજ્જ્ઞાન સુખશક્તિપયોનિધિઃ ॥ ૧॥

અંત્ય

નાસ્તિનારાયણ સમં ન ભૂતો ન ભવિષ્યતિ ।

એતેન સત્યવાક્યેન સર્વાર્થાંસાધયામ્યહમ્ ॥ ૧॥

॥ શ્રીમિથ્યાત્વાનુમાનધિખણ્ડનમ્ ॥

આદિ

વિમતં મિથ્યા દૃશ્યત્વાદ્યદિત્થં તત્તથા યથા સમ્પ્રતિપન્નમ્ ।

ઇત્યુક્તે જગતોઽભાવાદાશ્રયાસિદ્ધઃ પક્ષઃ ॥ ૧॥

અંત્ય

યો દૃશ્યતે સદાનંદનિત્યવ્યક્તચિદાત્મના ।

નિર્દોષાખિલકલ્યાણગુણં વન્દે રમાપતિમ્ ॥ ૧॥

॥ શ્રીતત્ત્વસઙ્ખ્યાનમ્ ॥

આદિ

સ્વતંત્રમસ્વતંત્રં ચ દ્વિવિધં તત્ત્વમિષ્યતે ।

સ્વતંત્રોભગવાન્વિષ્ણુઃ ભાવાભાવૌદ્વિધેતરત્ ॥ ૧॥

અંત્ય

સૃષ્ટિઃ સ્થિતિઃ સંહૃતિશ્ચ નિયમોઽજ્ઞાનબોધને ।
બંધો મોક્ષઃ સુખં દુઃખમાવૃતિર્જ્યોતિરેવ ચ ।
વિષ્ણુનાસ્ય સમસ્તસ્ય સમાસવ્યાસયોગતઃ ॥ ૧॥

॥ શ્રીતત્ત્વવિવેકઃ ॥

આદિ

સ્વતંત્રં પરતંત્રં ચ પ્રમેયં દ્વિવિધં મતમ્ ।
સ્વતંત્રોભગવાન્વિષ્ણુઃ નિર્દોષાખિલસદ્ગુણઃ ॥ ૧॥

અંત્ય

ય એતત્પરતન્ત્રં તુ સર્વમેવ હરેઃ સદા ।
વશમિત્યેવ જાનાતિ સંસારાન્મુચ્યતે હિ સઃ ॥ ૧॥

॥ શ્રીતત્ત્વોદ્યોતમ્ ॥

આદિ

સર્વત્રાખિલ સચ્છક્તિઃ સ્વતંત્રોઽશેષદર્શનઃ ।
નિત્યાતાદૃશચિચ્છેત્યયંતેષ્ટો નો રમાપતિઃ ॥ ૧॥

અંત્ય

સત્યચિચેત્યપતયે મુક્તામુક્તોત્તમાય તે ।
નમોનારાયણાયાર્યવૃંદવંદિતપદદ્વય ॥ ૧॥

જયત્યમિતપૌરુષઃ સ્વજનતેષ્ટચિંતામણિઃ ।
અજેશમુખવંદિતો ગુણગણાર્ણવઃ શ્રીપતિઃ ॥ ૨॥

સર્વજ્ઞાસન્મુનીંદ્રોચ્ચસન્મનઃ પઙ્કજાશ્રયઃ ।
અજિતો જયતિ શ્રીશો રમાબાહુલતાશ્રયઃ ॥ ૩॥

॥ શ્રીકર્મનિર્ણયઃ ॥

આદિ

ય ઈજ્યતે વિધીશાનશક્રપૂર્વૈર્મુખૈઃ સદા ।
રમાપ્રણયિને તસ્મૈ સર્વયજ્ઞાભુજે નમઃ ॥ ૧॥

અંત્ય

નમોનારાયણાયાજભવ શક્રોષ્ણરુઙ્મુખૈઃ ।

સદા વંદિતપાદાય શ્રીપાય પ્રેયસેઽધિકમ્ ॥ ૧॥

॥ શ્રીવિષ્ણુતત્ત્વવિનિર્ણયઃ ॥

આદિ

સદાગમૈક વિજ્ઞેયં સમતીતક્ષરાક્ષરમ્ ।
નારાયણં સદા વન્દે નિર્દોષાશેષસદ્ગુણમ્ ॥ ૧॥

વિશેષણાનિ યાનિહ કથિતાનિ સદુક્તિભિઃ ।
સાધયિષ્યામિ તાન્યેવ ક્રમાત્ સજ્જન સંવિદે ॥ ૨॥

અંત્ય

સ્વતંત્રાયાખિલેશાય નિર્દોષગુણરૂપિણે ।
પ્રેયસે મે સુપૂર્ણાય નમો નારાયણાય તે ॥ ૧॥

॥ શ્રીઋગ્ભાષ્યમ્ ॥

આદિ

નારાયણં નિખિલપૂર્ણગુણાર્ણમુચ્ચ ।
સૂર્યામિત્તદ્યુતિમશેષનિરસ્તદોષમ્ ।
સર્વેશ્વરં ગુરુમજેશનુતં પ્રણમ્ય ।
વક્ષ્યામ્યૃગર્થમતિતુષ્ટિકરં તદસ્ય ॥ ૧॥

અંત્ય

ઉપપૃત્તઃ ક્ષત્રિયૈસ્સ આવેશેન જનાર્દનઃ ।
હન્તિ શત્રૂંશ્ચ તૈર્દેવો ભયે ચ સ્વાશ્રયં દદૌ ॥ ૧॥

વર્તાઽભિગંતા તરુતા જેતા ચાસ્ય ન હિ ક્વચિત્ ।
યુદ્ધં મહાધનં ત્વર્ભં પ્રસિદ્ધં ધનમેવ હિ ॥ ૨॥

॥ શ્રીઐતરેયભાષ્યમ્ ॥

આદિ

નારાયણં નિખિલપૂર્ણગુણૈકદેહમ્ ।
સર્વજ્ઞમચ્યુતમપેતસમસ્તદોષમ્ ।
પ્રાણસ્ય સર્વચિદચિદ્પરમેશ્વરસ્ય ।
સાક્ષાદધીશ્વરમિયાં શરણં રમેશમ્ ॥ ૧॥

મહાભૂતિશ્શ્રુતિસ્સૈશાં મહાભૂતિર્યતો હરિઃ ।

વિશેષેણાત્ર કથિતઃ સર્વજ્ઞાઃ શાશ્વતઃ પ્રભુઃ ॥ ૨॥

અંત્ય

પૂર્ણાગણ્યગુણોદારધામ્ને નિત્યાય વેદસે ।
અમંદાનંદસાંદ્રાય પ્રેયસે વિષ્ણવે નમઃ ॥ ૧॥

॥ શ્રીતૈત્તિરીયભાષ્યમ્ ॥

આદિ

સત્યં જ્ઞાનમનંતમાનંદં બ્રહ્મ સર્વશક્ત્યેકં ।
સર્વૈર્દેવૈરીડ્યં વિષ્ણવાખ્યં સર્વદૈમિ સુપ્રેષ્ઠમ્ ॥ ૧॥

અંત્ય

પૂર્ણગણ્યગુણોદારધામ્ને નિત્યાય વેદસે ।
અમંદાનંદસાંદ્રાય પ્રેયસે વિષ્ણવે નમઃ ॥ ૧॥

॥ શ્રીબૃહદારણ્યકભાષ્યમ્ ॥

આદિ

પ્રાણાદેરીશિતારં પરમુખનિધિં સર્વદોષવ્યપેતમ્ ।
સર્વાંતસ્થં સુપૂર્ણં પ્રકૃતિ પતિમજં સર્વબાહ્યં સુનિત્યમ્ ।
સર્વજ્ઞં સર્વશક્તિં સુરમુનિમનુજાદ્યૈસ્સદા સેવ્યમાનમ્ ।
વિષ્ણું વન્દે સદાહં સકલજગદનાદ્યંતમાનંદદં તમ્ ॥ ૧॥

અંત્ય

પૂર્ણગણ્યગુણોદારધામ્ને નિત્યાય વેધસે ।
અમંદાનંદસાંદ્રાય પ્રેયસે વિષ્ણવે નમઃ ॥ ૧॥

॥ શ્રીઈશાવાસ્યભાષ્યમ્ ॥

આદિ

નિત્યાનિત્ય જગદ્ધાત્રે નિત્યાય જ્ઞાનમૂર્તયે ।
પૂર્ણનંદાય હરયે સર્વયજ્ઞભુજે નમઃ ॥ ૧॥

યસ્માદ્બ્રહ્મેન્દ્રરુદ્રદેવતાનાં શ્રિયોઽપિ ચ ।
જ્ઞાનસ્ફૂર્તિસ્સદા તસ્મૈ હરયે ગુરવે નમઃ ॥ ૨॥

અંત્ય

પૂર્ણશક્તિચિદાનંદશ્રીતેજઃ સ્પષ્ટમૂર્તયે ।

મમાભ્યધિક મિત્રાય નમો નારાયણાય તે ॥ ૧॥

॥ શ્રીકઠકભાષ્યમ્ ॥

આદિ

નમો ભગવતે તસ્મૈ સર્વતઃ પરમાય તે ।
સર્વપ્રાણિહૃદિસ્થાય વામનાય નમો નમઃ ॥ ૧॥

અંત્ય

નમો ભગવતે તસ્મૈ વિષ્ણવે પ્રભવિષ્ણવે ।
યસ્યાહમાપ્ત આપ્તેભ્યઃ યો મે આપ્તતમસ્સદા ॥ ૧॥

॥ શ્રીછાન્દોગ્યભાષ્યમ્ ॥

આદિ

અત્યુદ્રિક્ત વિદોષ સત્સુખ મહાજ્ઞાનૈકતાન્પ્રભા ।
સર્વપ્રાભવશક્તિભોગબલસત્સારાત્મદિવ્યાકૃતિમ્ ॥ ૧॥

સૃષ્ટિસ્થાનનિરોધનિત્યનિયતિ જ્ઞાનપ્રકાશાવૃત્તિ ।
ધ્વાંતામોક્ષવિમોક્ષદં હરિમજં નિત્યં સદોપાસ્મહે ।
હયગ્રીવમુખોદ્ગીર્ણગીર્ભિર્દેવી રમાપતિમ્ ।
અસ્તુવદ્વિસ્તૃતગુણં ભોગિપ્રસ્તરશાયિનમ્ ॥ ૨॥

અંત્ય

નિત્યાનંદો હરિઃપૂર્ણો નિત્યદા પ્રિયતાં મમ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ ચ વિષ્ણવે ॥ ૧॥

॥ શ્રીઆથર્વણભાષ્યમ્ ॥

આદિ

આનંદમજરં નિત્યમજમક્ષયમચ્યુતમ્ ।
અનંતશક્તિં સર્વજ્ઞં નમસ્યે પુરુષોત્તમમ્ ॥ ૧॥

મનોર્વૈવસ્વતસ્યાદાવથર્વા બ્રહ્મણોઽજનિ ।
મિત્રશ્ચ વરુણસ્યાથો પ્રહેતિર્હેતિરેવ ચ ।
બ્રહ્મણઃ પ્રથમે કલ્પે શિવઃ પ્રથમજઃ સ્મૃતઃ ।
સનકાદ્યાસ્તુ વારાહે બ્રહ્મા વિષ્ણોઃ સુતોગ્રજઃ ॥ ૨॥

અંત્ય

પ્રિયતાં ભગવન્મહ્યં પ્રેષ્ઠપ્રેષ્ઠતમસ્સદા ।
મમ નિત્યં નમામ્યેનં પરમોદારસદ્ગુણમ્ ॥ ૧॥

॥ શ્રીમાણ્ડૂક્યભાષ્યમ્ ॥

આદિ

પૂર્ણનંદજ્ઞાનશક્તિ સ્વરૂપં નિત્યમવ્યયમ્ ।
ચતુર્ધા સર્વભોક્તારં વંદે વિષ્ણું પરં પદમ્ ॥ ૧॥

અંત્ય

એકોઽપિ નિર્વિશેષોઽપિ ચતુર્ધા વ્યવહારભાક્ ।
યસ્તં વંદે ચિદાનંદં વિષ્ણું વિશ્વાદિરૂપિણમ્ ॥ ૧॥

॥ શ્રીષટ્પ્રશ્નભાષ્યમ્ ॥

આદિ

નમો ભગવતે તસ્મૈ પ્રાણાદિપ્રભવિષ્ણવે ।
અમંદાનંદસાંદ્રાય વાસુદેવાય વેદસે ॥ ૧॥

અંત્ય

નમો નમોઽસ્તુ હરયે પ્રેષ્ઠપ્રેષ્ઠતમાય મે ।
પરમાનંદસંદોહસાંદ્રાનંદ વપુષ્મતે ॥ ૧॥

॥ શ્રીતળવાકારોપનિષદ્ભાષ્યમ્ ॥

આદિ

અનંત ગુણપૂર્ણત્વાદગમ્યાય સુરૈરપિ ।
સર્વેષ્ટદાત્રે દેવાનાં નમો નારાયણાય તે ॥ ૧॥

અંત્ય

યશ્ચિદાનંદ સચ્છક્તિ સમ્પૂર્ણો ભગવાન્પરઃ ।
નમોઽસ્તુ વિષ્ણવે તસ્મૈ પ્રેષ્ઠાય પ્રેયસાં ચ મે ॥ ૧॥

॥ શ્રીગીતાતાત્પર્યમ્ ॥

આદિ

સમસ્તગુણસમ્પૂર્ણં સર્વદોષવિવર્જિતમ્ ।
નારાયણં નમસ્કૃત્ય ગીતાતાત્પર્યમુચ્યતે ॥ ૧॥

અંત્ય

નમસ્તે વાસુદેવાય પ્રેયસાં મે પ્રિયોત્તમ ।
સમસ્તગુણસમ્પૂર્ણ નિર્દોષાનંદ દાયિને ॥ ૧॥

નિઃશેષદોષરહિત કલ્યાણાશેષલસદ્ગુણ ।
ભૂતિસ્વયંભૂશર્વાદિવંદ્યં ત્વાં નૌમિ મે પ્રિયમ્ ॥ ૨॥

નમોજભવભૂર્યક્ષપુરઃ સરસુરાશ્રય ।
નારાયણારણં મહ્યં રમાપતે પ્રેયસાં પ્રિય ॥ ૩॥

॥ શ્રીન્યાયવિવરણમ્ ॥

આદિ

ચેતનાચેતનજગન્નિયંત્રેઽશેષસંવિદે ।
નમોનારાયણયાજશર્વશક્રાદિવંદિતમ્ ॥ ૧॥

અંત્ય

ચેતનાચેતનાસ્યાસ્ય સમસ્તસ્ય યદિચ્છયા ।
સ મમ સુકૃતેનૈવ પ્રિયતાં પુરુષોત્તમઃ ॥ ૧॥

॥ શ્રીનરસિંહનખસ્તુતિઃ ॥

આદિ

પાન્ત્વસ્માન્ પુરુહૂતવૈરિ બલવન્માતઙ્ગ માદ્યદ્ઘટા ।
કુંભોચ્ચાદ્રિ વિપાટનાધિકપટુ પ્રત્યેક વજ્રાયિતાઃ ।
શ્રીમત્કંઠીરવાસ્ય પ્રતત સુનખરા દારિતારાતિદૂર ।
પ્રદ્ધ્વસ્તધ્વાંત શાંત પ્રવિતત મનસા ભાવિતાનાકિવૃંદૈઃ ॥ ૧॥

અંત્ય

લક્ષ્મીકાંત સમંતતોઽપિકલયન્ નૈવેશિતુસ્તે સમમ્ ।
પશ્યામ્યુત્તમ વસ્તુ દૂરતરતોપાસ્તં રસોયોઽષ્ટમઃ ।
યદ્રોશોત્કર દક્ષ નેત્ર કુટિલઃ પ્રાંતોત્થિતાગ્નિ સ્ફુરત્ ।
ખદ્યોતોપમ વિસ્ફુલિઙ્ગભસિતા બ્રહ્મેશશક્રોત્કરાઃ ॥ ૨॥

॥ શ્રીયમકભારતમ્ ॥

આદિ

ધ્યાયેત પરમાનંદં યન્માતાપતિમયદપરમાનંદમ્ ।
ઉજ્ઝિતપરમાનંદં પત્યાદ્યાદ્યાશ્રમૈઃ સદૈવ પરમાનંદમ્ ॥ ૧॥

અંત્ય

ઇતિ નારાયણનામા સુખતીર્થસુપૂજિતસ્સુરાયણનામા ।
પૂર્ણગુણૈરધિકજ્ઞાણેચ્છાભક્તિભિસ્સ્વધિક પૂર્ણઃ ॥ ૧॥

॥ શ્રીદ્વાદશસ્તોત્રમ્ ॥

આદિ

વન્દે વન્દ્યં સદાનંદં વાસુદેવં નિરઞ્જનમ્ ।
ઇન્દિરાપતિમાદ્યાદિ વરદેશ વરપ્રદમ્ ॥ ૧॥

અંત્ય

આનંદચંદ્રિકાસ્યંદક વંદે આનંદતીર્થપરાનંદ વરદ ॥ ૧॥

॥ શ્રીકૃષ્ણામૃતમહાર્ણવમ્ ॥

આદિ

અર્ચિતઃ સંસ્મૃતો ધ્યાતઃ કીર્તિતઃ કથિતઃ શ◌ૃતઃ ।
યો દદાત્યમૃતત્ત્વં હિ સ માં રક્ષતુ કેશવઃ ॥ ૧॥

અંત્ય

શ્રીમદાનંદતીર્થાખ્ય સહસ્રકિરણોત્થિતા ।
ગોતતિઃ સતતં સેવ્યા ગીર્વાણૈઃ સિદ્ધિદા ભવેત્ ॥ ૧॥

॥ શ્રીતંત્રસારસંગ્રહઃ ॥

આદિ

જયત્યબ્જભવેશેંદ્રવંદિતઃ કમલાપતિઃ ।
અનંત વિભવાનંદ દશશ્તિજ્ઞાનાદિસદ્ગુણઃ ॥ ૧॥

વિધિં વિધાય સર્ગાદૌ તેન પૃષ્ટોઽબ્જલોચનઃ ।
આહ દેવો રમોત્સઙ્ગવિલસત્પાદપલ્લવઃ ॥ ૨॥

યઃ સર્વગુણસમ્પૂર્ણઃ સર્વદોષવિવર્જિતઃ ।
પ્રિયતાં પ્રીત એવાલં વિષ્ણુર્મે પરમઃ સુહૃત્ ॥ ૩॥

અંત્ય

અશેષદોષોજ્ઝિતપૂર્ણસદ્ગુણં સદાવિશેષાપગતોરુરૂપમ્ ।
નમામિ નારાયણમપ્રતીપં સદા પ્રિયેભ્યઃ પરમાદરેણ ॥ ૧॥

॥ શ્રીસદાચારસ્મૃતિઃ ॥

આદિ

યસ્મિન્સર્વાણિકર્માણિ સંન્યસ્યાધ્યાત્મ ચેતસા ।
નિરાશી નિર્મમો યાતિ પરં જયતિ સોઽચ્યુત ॥ ૧॥

અંત્ય

અશેષકલ્યાણ ગુણનિત્યાનુભવસત્તનુઃ ।
અશેષદોષરહિતઃ પ્રિયતાં પુરુષોત્તમઃ ॥ ૧॥

॥ શ્રીભાગવતતાત્પર્યનિર્ણયઃ ॥

આદિ

સૃષ્ટિસ્થિત્યપ્યેહાનિયતિદૃશિતમોબંધમોક્ષાશ્ચ ।
યસ્માદસ્ય શ્રીબ્રહ્મરુદ્રપ્રભૃતિ સુરનરવ્યધીશશક્ત્રવાત્મકસ્ય ।
વિષ્ણોર્વ્યસ્તાસ્સમસ્તાસ્સકલગુણનિધિસર્વદોષવ્યપેતઃ ।
પૂર્ણનંદોઽવ્યયો યો ગુરુરપિ પરમંશ્રિતયેત્તં મહાંતમ્ ॥ ૧॥

અંત્ય

નિત્યાદોષસ્વરૂપાય ગુણપૂર્ણાયસર્વદા ।
નારાયણાય હરયે નમઃ પ્રેષ્ઠતમાય મે ॥ ૧॥

॥ શ્રીભારતતાત્પર્યનિર્ણયઃ ॥

આદિ

નારાયણાય પરિપૂર્ણગુણાર્ણવાય વિશ્વોદયસ્થિતિલયોન્નિયતિ પ્રદાય ।
જ્ઞાનપ્રદાય વિબુધાસુર સૌખ્યદુઃખ સત્કારણય વિતતાય નમો નમસ્તે ॥ ૧॥

આસીદુદારગુણવારિધિરપ્રમેયો નારાયણઃ પરતમઃ પરમાત્સ એકઃ ।
સંશાંતસંવિદખિલં જઠરે નિધાય લક્ષ્મીભુજાંતરગતસ્સ્વરોતોઽપિચાગ્રે ॥ ૨॥

અંત્ય

તસ્માદયં ગ્રંથવરોઽખિલોરુધર્માદિમોક્ષાંતપુમર્થહેતુઃ ।
કિઞ્ચોદિતૈસ્તસ્યગુણૈસ્તદોન્યૈર્નારાયણઃ પ્રીતિમુપૈત્યતોલમ્ ॥ ૧॥

યસ્સર્વગુણસમ્પૂર્ણસ્સર્વદોષવિવર્જિતઃ ।
પ્રિયતાં પ્રીત એવાલં વિષ્ણુર્મે પરમસ્સુહૃત્ ॥ ૨॥

॥ શ્રીયતિપ્રણવકલ્પ ॥

આદિ

નત્વા નારાયણં વન્દે પૂર્ણં બ્રહ્મહરાર્ચિતમ્ ।
યતેરાચરણં વક્ષ્યે પૂર્ણશાસ્ત્રનુસારતઃ ॥ ૧॥

સમિચ્ચ્યર્વાદિકાન્હુત્વ સમ્યક્પુરુષસૂક્તતઃ ।
સર્વેશામભયં દત્વા વિરક્તઃ પ્રવ્રજેદ્ધરિમ્ ॥ ૨॥

અંત્ય

ધ્યેયો નારાયણો નિત્યં સૃષ્ટિસ્થિત્યંતકારકઃ ।
ભક્તાનાં મુક્તિદો નિત્યામધમાજ્ઞાનિનાં તમઃ ॥ ૧॥

તદર્થાન્ બ્રહ્મસૂત્રેણ સમ્યઙ્ગ્નિર્ણય તત્ત્વતઃ ।
વિષ્ણોસ્સર્વોત્તમત્વં હિ સર્વદા પ્રતિપાદય ॥ ૨॥

॥ શ્રીજયંતીનિર્ણય ॥

આદિ

રોહિણ્યામર્ધરાત્રે તુ યદા કૃષ્ણાષ્ટમિ ભવેત્ ।
જયંતીનામ સા પ્રોક્તા સર્વપાપપ્રણાશિનિ ॥ ૧॥

પ્રભાતકાલે મેધાવી યોગાયેતી યથાવિધિ ।
નિત્યાન્હીકં પ્રકુર્વીત ભગવંતમનુસ્મરન્ ।
વિશ્વાયેતિ ચ મંત્રેણ તતઃ સ્વાપં સમાચરેત્ ॥ ૨॥

અંત્ય

સર્વાયેતિ ચ મન્ત્રેણ તતઃ પારણમાચરેત્ ।
ધર્માયેતિ તતઃ સ્વસ્થો મુચ્યતે સર્વકિલ્બિષૈઃ ॥ ૧॥

॥ શ્રીકૃષ્ણસ્તુતિઃ ॥

અંબરગઙ્ગાચુંબિતપાદઃ પદતલવિગલિતગુરુતરશકટઃ ।
કાળિયનાગક્ષ્વેલન હંતા સરસિજનવદલ્વિકસિતનયનઃ ।
કાલઘનાલિકુર્બુરકાયઃ શરશતશકલિત સુરરિપુનિવહઃ ।
સંતતમસ્માન્પાતુ મુરારિઃ સતતગસમજવખગપતિનિરતઃ ।
॥ ભારતીરમણમુખ્યપ્રાણાંતર્ગત શ્રીકૃષ્ણર્પણમસ્તુ ॥

Encoded by H. P. Raghunandan hpraghu at genius.tisl.soft.net and
Shrisha Rao shrao at nyx.net

*Adyanta shlokANi*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*